# Benedictory verses in Mahābhārata Manuscripts

Kashmiri version K3 (Baroda, Oriental Institute Library, No. 632. Dated V. Sam. 1775 (ca. A.D. 1519)

ॐ नमः श्रीविघ्नविनाशनाय
(oṁ namaḥ srīvighnavināśanāya)

जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः
यस्यास्यकमलकोशे वाङ्मयं अमृतं पिबति लोकः

(jayati parāśarasūnuḥ satyavatīhṛdayanandano vyāsaḥ
yasyāsyakamalakośe vāṅmayaṁ amṛtaṁ pibati lokaḥ)

धर्मदृढबद्धमूलो वेदस्कन्धः पुराणशाखाढ्यः
क्रतुकुसुमो मोक्षफलो जयति कल्पद्रुमो विष्णुः

(dharmadṛḍhabaddhamūlo vedaskandhaḥ purāṇaśākhāḍhyaḥ
kratukusumo mokṣaphalo jayati kalpadrumo viṣṇuḥ)

पितामहाद्यं प्रवदन्ति षष्ठम्
महर्षिं अक्षय्यविभूतियुक्तम्
नारायणस्यांशजमेकपुत्रम्
द्वैपायनं वेदनिधिं नमामि

(pitāmahādyaṁ pravadanti ṣaṣṭham
maharṣiṁ akṣayyavibhūtiyuktam
nārāyaṇasyāṁśajamekaputram
dvaipāyanaṁ vedanidhiṁ namāmi)

पाराशर्यवचः सरोजममलं गीतार्थगन्धोत्कटम्
नानाख्यानककेसरं हरिकथासंबोधनाबोधितम्
लोके सज्जनषट्पदैर् अहरहः पेपीयमानं मुदा
भूयाद् भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे

(pārāśaryavacaḥ sarojamamalaṁ gītārthagandhotkaṭam
nānākhyānakakesaraṁ harikathāsaṁbodhanābodhitam
loke sajjanaśaṭpadair aharahaḥ pepīyamānaṁ mudā
bhūyād bhāratapaṅkajaṁ kalimalapradhvaṁsi naḥ śreyase)

D14 (Poona, Bombay Govt. Collection (deposited at the BORI), Visrambag II, No. 191)

श्रीगणेशाय नमः
(śrīgaṇeśāya namaḥ)

श्रीलक्ष्मीनृसिम्हाय नमः

(śrīlak.smīnṛsimhāya namaḥ)

यः श्वेतत्वं उपागतः कृतयुगे त्रेतायुगे रक्तताम्
युग्मे यः कपिलः कलौ च भगवान् कृष्णत्वं आयाग *
* * * * * * * दन्ति मुनयो यो योगिभिर् गीयते
स ब्रह्मा यदि वा हरो यदि शिवो यः कोऽपि तस्मै नमः

(yaḥ śvetatvaṁ upāgataḥ kṛtayuge tretāyuge raktatām
yugme yaḥ kapilaḥ kalau ca bhagavān kṛṣṇatvaṁ āyāga *
* * * * * * danti munayo yo yogibhir gīyate
sa brahmā yadi vā haro yadi śivo yaḥ ko'pi tasmai namaḥ)

T1 (Melkote Yadugiri Yatiraj Math Library MS. (without number))

श्रीगुरुभ्यो नमः

(śrīgurubhyo namaḥ)

वागीशाद्याः सुमनसः सर्वार्थानां उपक्रमे
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्

(vāgīśādyāḥ sumanasaḥ sarvārthānām upakrame
yaṁ natvā kṛtakṛtyāḥ syustaṁ namāmi gajānanaṁ)

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्
पराशरात्मजं वन्दे शुकतातं तपोनिधिम्

(vyāsaṁ vasiṣṭhanaptāraṁ śakteḥ pautramakalmaṣam
parāśarātmajaṁ vande śukatātaṁ taponidhim)

**अचतुर्वदनो ब्रह्मा द्विबाहुर् अपरो हरिः**
**अफाललोचनः शम्भुर् भगवान् बादरायणः**

(acaturvadano brahmā dvibāhur aparo hariḥ
aphālalocanaḥ śambhur bhagavān bādarāyaṇaḥ)

G7 (Melkote, Yadugiri Yatiraj Math Library MS (without number))

**हरिः ॐ श्रीवेदव्यासाय नमः**

(hariḥ oṁ śrīvedavyāsāya namaḥ)

**श्रीमते रामानुजाय नमः**

(śrimate rāmānujāya namaḥ)

**शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्**
**प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये**

(śuklāmbaradharaṁ devaṁ śaśivarṇaṁ caturbhujam
prasannavadanaṁ dhyāyet sarvavighnopaśāntaye)

G2 (Melkote, Yadugiri Yatiraj Math Library MS. without number)

**ज्ञानानन्दमयं देवं निर्मलं स्फटिकाकृतिम्**
**आधारं सर्वविद्यानां हयग्रीवं उपास्महे**

(jñānānandamayaṁ devaṁ nirmalaṁ sphaṭikākṛtim
ādhāraṁ sarvavidyānām hayagrīvaṁ upāsmahe)

**व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे**
**नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः**

(vyāsāya viṣṇurūpāya vyāsarūpāya viṣṇave

namo vai brahmanidhaye vāsiṣṭhāya namo namaḥ)

नमो धर्माय महते नमः कृष्णाय वेधसे
ब्राह्मणेभ्यो नमस्कृत्वा धर्मान् वक्ष्यामि शाश्वतान्

(namo dharmāya mahate namaḥ kṛṣṇāya vedhase
brāhmaṇebhyo namaskṛtvā dharmān vakṣyāmi śāśvatān)

अभ्रश्यामः पिङ्गजटाबद्धकलापः
प्रांशुर् दण्डी कृष्णमृगत्वक्परिधानः
साक्षाल् लोकान् पावयमानः कविमुख्यः
पाराशर्यः पर्वसु रूपं विवृणोतु

(abhraśyāmaḥ piṅgajaṭābaddhakalāpaḥ
prāṁśur daṇḍī kṛṣṇamṛrgatvakparidhānaḥ
sākṣāl lokān pāvayamānaḥ kavimukhyaḥ
pārāśaryaḥ parvasu rūpaṁ vivṛṇotu)

G5 begins with:

अशुभानि निराचष्टे तनोति शुभसंततिम्
स्मृतमात्रेण यः पुंसां ब्रह्म तन् मङ्गलं विदुः

(aśubhāni nirācaṣṭe tanoti śubhasaṁtatim
smṛtamātreṇa yaḥ puṁsāṁ brahma tan maṅgalaṁ viduḥ)

G6 (Tanjore, Saraswati Mahal Library, No. 11860)

हरिः ॐ शुभं अस्तु

(hariḥ om śubhaṁ astu)

धर्मो विवर्धति युधिष्ठिरकीर्तनेन
पापं प्रणश्यति वृकोदरकीर्तनेन
शत्रुर् विनश्यति धनंजयकीर्तनेन
माद्रीसुतौ कथयतां न भवन्ति रोगाः

(dharmo vivardhati yudhiṣṭhirakīrtanena

pāpaṁ praṇaśyati vṛkodarakīrtanena
śatrur vinaśyati dhanaṁjayakīrtanena
mādrīsutau kathayatāṁ na bhavanti rogāḥ)

सरस्वतीपदं वन्दे श्रियः पतिं उमापतिम्
त्विषां पतिं गणपतिं बृहस्पतिमुखान् ऋषीन्

(sarasvatīpadaṁ vande śriyaḥ patim umāpatim
tviṣāṁ patiṁ gaṇapatiṁ bṛhaspatimukhān ṛṣīn)

Malayalam version M3 (Cochin, State Library, No.1. Dated Kollam 1013 (ca. A.D. 1838) begins with:

नारायणं सुरगुरुं जगदेकनाथम्
भक्तप्रियं सकललोकनमस्कृतं च
त्रैगुण्यवर्जितमजं विभुमाद्यमीशम्
वन्दे भवघ्नमसुरासुरसिद्धवन्द्यम्

(nārāyaṇaṁ suraguruṁ jagadekanātham
bhaktapriyaṁ sakalalokanamaskṛtaṁ ca
traiguṇyavarjitamajaṁ vibhumādyamīśam
vande bhavaghnamasurāsurasiddhavandyam)